॥ श्री गणेशाय नमः ॥

# अथ श्री महादुर्गा पंचोपचार पूजनम्

## ध्यानम्

**(हाथ में अक्षत, पुष्प लेकर ध्यान करें)**

**ॐ विद्युद्दामसमप्रभां मृगपतिस्कन्धस्थितां भीषणां,**
**कन्याभिः करवालखेटविलसद्धस्ताभिरासेविताम् ।**
**हस्तैश्चक्रगदासिखेटविशिखांश्चापं गुणं तर्जनीं**
**बिभ्राणामनलात्मिकां शशिधरां दुर्गां त्रिनेत्रां भजे ॥**

(ॐ भूर्भुवः स्वः श्री दुर्गा देव्यै नमः ध्यानं समर्पयामि)
(दुर्गा जी के चरणों में अक्षत्, पुष्प चढ़ायें)

## चन्दनम्

**ॐ श्रीखण्डं चन्दनं दिव्यं गन्धाढ्यं सुमनोहरम् ।**
**विलेपनं सुरश्रेष्ठ चन्दनं प्रति गृह्यताम् ॥**

(ॐ भूर्भुवः स्वः श्री दुर्गा देव्यै नमः चन्दनम् समर्पयामि)
(दुर्गा जी के मस्तक में चन्दन लगायें)

## पुष्पम्

**ॐ सुरभिः पुष्पनिचयैः ग्रथितां शुभमालिकाम् ।**
**ददामि तव शोभार्थं गृहाण परमेश्वरि॥**

(ॐ भूर्भुवः स्वः श्री दुर्गा देव्यै नमः पुष्पम् समर्पयामि)
(दुर्गा जी के चरणों में पुष्प चढ़ायें)

## धूपम्

**ॐ दशाङ्गगुग्गुलं धूपं चन्दनागरुसंयुतम् ।**
**समर्पितं मया भक्त्या महादेवि प्रगृह्यताम् ॥**

(ॐ भूर्भुवः स्वः श्री दुर्गा देव्यै नमः धूपम् आघ्रापयामि)
(दुर्गा जी को धूप दिखायें)

## दीपम्

**ॐ घृतवर्तिसमायुक्तं महातेजो महोज्ज्वलम् ।**
**दीपं दास्यामि देवेशि सुप्रीता भव सर्वदा ॥**

(ॐ भूर्भुवः स्वः श्री दुर्गा देव्यै नमः दीपम् दर्शयामि)
(दुर्गा जी को दीप दिखायें)

## नैवेद्यम्

**ॐ अन्नं बहुविधं स्वादु रसैः षड्भिः समन्वितम् ।**
**नैवेद्यं गृह्यतां देवि भक्ति में ह्यचलां कुरु॥**

(ॐ भूर्भुवः स्वः श्री दुर्गा देव्यै नमः नैवेद्यं निवेदयामि)
(एक पात्र में दुर्गा जी के सामने भोग रखें तथा खाली पात्र में तीन बार जल छोड़ें)

## प्रार्थयेत्

**(हाथ में अक्षत, पुष्प लेकर प्रार्थना करें)**

**ॐ सर्वमंगल-मांगल्ये शिवेसर्वार्थसाधिके ।**
**शरण्ये त्रयम्बके गौरि नारायणि नमोस्तुते ॥**

(ॐ भूर्भुवः स्वः श्री दुर्गा देव्यै नमः प्रार्थना पूर्वकं नमस्कारान् समर्पयामि)
(दुर्गा जी के चरणों में अक्षत्, पुष्प चढ़ायें)

**अनेन पंचोपचार पूजनेन श्रीदुर्गादेवी प्रीयतां न मम ॥**

(दुर्गा जी के चरणों में एक आचमनी जल चढ़ायें)

॥ इति शुभम् भवतु ॥